**तक्ष्य(स्)** पु० ब० व० स्था—बा० कुषि द्विवच्च । मानवे निघण्टुः ।

**ताक्षण्य** पुंस्त्री तक्ष्णोऽपत्यं कारित्वात् ण्य । तक्ष्णोऽपत्ये । पक्षे ''तक्ष्णोऽण उपसंख्यानम्'' पा० अण् मपूर्वत्वादनोऽल्लोपः । ताक्ष्ण तत्रार्थे पुंस्त्री० ।

**ताच्छीलिक** पु० तच्छीलार्थे विहितः ठञ् । तच्छीलार्थविहिते प्रत्यये । ''ताच्छीलिकेषु वा सरूपविधिर्नास्ति'' पा० ''ताच्छीलिकेष्वेऽण् कृतानि भवन्ति'' व्या०प० । [स्वभावे ।

**ताच्छील्य** न० तत् शीलमस्य तस्य भावः ष्यञ् । नियततत्-

**ताज(जि)क** न० नीलकण्ठादिप्रणीते वर्षलग्नज्ञानादिनिरूपके ज्योतिषग्रन्थभेदे । ''न स्याच्छुभं क्वचन ताज(जि)कशास्त्रगीतम्'' नील० ता० । [शीघ्रे निघण्टुः ।

**ताजत्** त्रि० तनुज—सङ्कोचे बा० अदि इट्विलोपौ ।

**ताट(ड)ङ्क** पु० ताड्यते ताडः पृषो० वा डस्य टः तथाभूतोऽङ्कः चिह्नं यस्य शक० । कर्णभूषणभेदे द्विरूपको० ।

**ताटस्थ्य** न० तटस्थस्य भावः ष्यञ् । १औदासीन्ये २नैकट्ये च

**ताड** पु० चु० तड—भावे अच् । १ताड़ने २गुणने च कर्म्मणि अच् ।३शब्दे ४मुष्टिमेयतृणादौ मेदि० ५पर्वते हेमच०।

**ता(ट)ड़का** स्त्री । राक्षसीभेदे । तस्या उत्पत्तिकथा रामा० बा० २५ अ० ।
''पूर्वमासीन् महायक्षः सुकेतुर्नाम वीर्य्यवान् । अनपत्यः शुभाचारः स च तेपे महत्तपः। पितामहस्तु सुप्रीतस्तस्य यक्षपतेस्तदा । कन्यारत्नं ददौ राम ! ताड़(ट)कां नाम नामतः । ददौ नागसहस्रस्य बलं चास्याः पितामहः । न त्वेव पुत्रं यक्षाय ददौ चासौ महायशाः । तान्तु बालां विवर्धन्तीं रूपयौवनशालिनीम् । जम्भ पुत्राय सुन्दाय ददौ भार्य्यां यशस्विनीम् । कस्य चित्त्वथ कालस्य यक्षी पुत्रं व्यजायत । मारीचं नाम दुर्धर्षं यः शापाद्राक्षसोऽभवत् । सुन्दे तु निहते राम ! अगस्त्यमृषिसत्तमम् । ता(ट)ड़का सह पुत्रेण प्रधर्षयितुमैच्छत । भक्षार्थं जातसंरम्भा गर्जन्ती साभ्यधावत । आपतन्तीं तु तां दृष्ट्वा अगस्त्यो भगवानृषिः । राक्षसत्वं भजस्वेति मारीचं व्याजहार सः । अगस्त्यः परमामर्षस्ता(ट)ड़कामपि शप्तवान् । पुरुषादी महायक्षी विकृता विकृतानना । इदं रूपं विहायाशु दारुणं रूपमस्तु ते । सैषा शापकृताऽमर्षा ता(ट)ड़का क्रोधमूर्च्छिता । देशमुत्सादयत्येनमगस्त्याचरितं शुभम् । एनां राघव ! दुर्वृत्तां यक्षीं परमदारुणाम् । गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम्'' । ''ताड़का चलकपालकुण्डला'' रघुः । ''तां ताड़काख्यां निजघान रामः'' भट्टिः । [रत्नमा० ।

**ताड़काफल** न० तारकेव फलमस्याः रस्य डः । वृहदेलायां

**ताड़कारि** पु० ६त० । रामचन्द्रे तस्य ताड़काहननकथा । रामा० अयो० २६ अ० । ''तामापतन्तीं वेगेन विक्रान्तामशनीमिव । शरेणोरसि विव्याध पपात च ममार च'' ।

**ताड़केय** पु० ताड़काया अपत्यम् ढक् । मारीचे ''मारीचः सुन्दपुत्रस्य ताड़कायां व्यजायत'' हरिवं ३ अ० ।

**ताड़कायन** पु० विश्वामित्रपुत्रभेदे । ''महान्तृषिश्च कपिलस्तथर्षिस्ताड़कायनः'' भा० आनु० ४ अ० । विश्वामित्र पुत्रकथने ।

**ताड़घ** पु० तालं हन्ति हन+टक् नि० उप० स० । तालवादके शिल्पिभेदे अशिल्पिनि तु अण् । ताड़घात इत्येव ।

**ताड़न** न० चु० तड—भावे ल्युट् । १आघाते ।''लालने बहवो दोषास्ताड़ने बहवो गुणाः'' चाणक्यम् । ''अवतंसोत्पलताड़नानि वा'' कुमा० । २दीक्षाङ्गे दीक्षणीयमन्त्रसंस्कारभेदे च । ''मन्त्रवर्णान् समालिख्य ताड़येच्चन्दनाम्भसा । प्रत्येकं वायुना मन्त्री ताड़नं तदुदाहृतम्'' शार०ति० । वायुना यंबीजेन । ३गुणने च ।

**ताड़नी** स्त्री ताड्यतेऽनया ताड़ि—करणे ल्युट् ङीप् । अश्वादेस्ताड़नसाधने कशायां (चावुक) अमरः ।

**ताड़पत्र** न० तालस्य पत्रमिव लस्य डः । कर्णभूषणभेदे ताड़ङ्के हेमच० ।

**ताड़ाग** त्रि० तड़ागे भवम् अण् । तड़ागभवे जलादौ ष्यप्सु स्त्री ''ताड़ागं वातलं स्वादु कषायं कटुपाकि च । हेमन्ते सारसं ताड़ागं वा सेवेत'' सुश्रुतः ।

**ताड़ि** स्त्री चु० तड इन् । (ताड़िग्रात) १पत्रप्रधाने वृक्षे भरतः वङ्गीप् तत्रार्थे स्त्री मेदि० । २आभरणभेदे दुर्गसिंहः । ''प्रक्रीड़ितचपलकपिलकपिकुलकरतलताड़नतरलिततताड़ीपुटैः'' काद० ।

**ताडुल** पु० चु०तड़—उल । ताड़के संक्षिप्तसा० ।

**ताड्यमान** त्रि० चु० तड़—कर्मणि शानच् । १ताडनकर्मणि ''श्रोतुर्वितन्त्रीरिव ताड्यमाना'' कुमा० । २पटहे पु० त्रिका० । [ताण्डवशब्दे दृश्यम् ।

**ताण्ड** न० तण्डिना मुनिना कृतम् अण् । नृत्यशास्त्रे

**ताण्डव** न० तण्डिकृतं ताण्डं नृत्यशास्त्रं तत् प्रतिपादकतयास्त्यस्य व, तण्डुना (नन्दिना) प्रोक्तम् अण् इति क्षीरस्वामी । नृत्ये अमरः ''पुंन्नृत्यं ताण्डवं प्रोक्तं''